# Shri Sarasvati Stotram (Agastyamuni Proktam)

# શ્રીસરસ્વતીસ્તોત્રં અગસ્ત્યમુનિપ્રોક્તમ્

## Document Information

Text title : sarasvatI stotram

File name : sarasvatiAgastya.itx

Category : devii, sarasvatI, stotra, agastya, devI

Location : doc_devii

Author : agastyamuni

Proofread by : Ravin Bhalekar ravibhalekar at hotmail.com

Latest update : January 25, 2005, October 9, 2021

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

October 9, 2021

*sanskritdocuments.org*

# શ્રીસરસ્વતીસ્તોત્રં અગસ્ત્યમુનિપ્રોક્તમ્

શ્રીગણેશાય નમઃ ।
યા કુન્દેન્દુતુષારહારધવલા યા શુભ્રવસ્ત્રાવૃતા
યા વીણાવરદણ્ડમણ્ડિતકરા યા શ્વેતપદ્માસના ।
યા બ્રહ્માચ્યુતશઙ્કરપ્રભૃતિભિર્દેવૈસ્સદા પૂજિતા (વન્દિતા)
સા માં પાતુ સરસ્વતી ભગવતી નિશ્શેષજાડ્યાપહા ॥ ૧॥

દોર્ભિર્યુક્તા ચતુર્ભિઃ સ્ફટિકમણિનિભૈરક્ષમાલાન્દધાના
હસ્તેનૈકેન પદ્મં સિતમપિચ શુકં પુસ્તકં ચાપરેણ ।
ભાસા કુન્દેન્દુશઙ્ખસ્ફટિકમણિનિભા ભાસમાનાઽસમાના
સા મે વાગ્દેવતેયં નિવસતુ વદને સર્વદા સુપ્રસન્ના ॥ ૨॥

સુરાસુરાસેવિતપાદપઙ્કજા કરે વિરાજત્કમનીયપુસ્તકા ।
વિરિઞ્ચિપત્ની કમલાસનસ્થિતા સરસ્વતી નૃત્યતુ વાચિ મે સદા ॥ ૩॥

સરસ્વતી સરસિજકેસરપ્રભા તપસ્વિની સિતકમલાસનપ્રિયા ।
ઘનસ્તની કમલવિલોલલોચના મનસ્વિની ભવતુ વરપ્રસાદિની ॥ ૪॥

સરસ્વતિ નમસ્તુભ્યં વરદે કામરૂપિણિ ।
વિદ્યારમ્ભં કરિષ્યામિ સિદ્ધિર્ભવતુ મે સદા ॥ ૫॥

સરસ્વતિ નમસ્તુભ્યં સર્વદેવિ નમો નમઃ ।
શાન્તરૂપે શશિધરે સર્વયોગે નમો નમઃ ॥ ૬॥

નિત્યાનન્દે નિરાધારે નિષ્કલાયૈ નમો નમઃ ।
વિદ્યાધરે વિશાલાક્ષિ શુદ્ધજ્ઞાને નમો નમઃ ॥ ૭॥

શુદ્ધસ્ફટિકરૂપાયૈ સૂક્ષ્મરૂપે નમો નમઃ ।
શબ્દબ્રહ્મિ ચતુર્હસ્તે સર્વસિદ્ધ્યૈ નમો નમઃ ॥ ૮॥

મુક્તાલઙ્કૃતસર્વાઙ્ગ્યૈ મૂલાધારે નમો નમઃ ।
મૂલમન્ત્રસ્વરૂપાયૈ મૂલશક્ત્યૈ નમો નમઃ ॥ ૯॥

મનોમયિ મહાયોગે વાગીશ્વરિ નમો નમઃ ।
વાણ્યૈ વરદહસ્તાયૈ વરદાયૈ નમો નમઃ ॥ ૧૦॥

વેદ્યાયૈ વેદરૂપાયૈ વેદાન્તાયૈ નમો નમઃ ।
ગુણદોષવિવર્જિન્યૈ ગુણદીપ્ત્યૈ નમો નમઃ ॥ ૧૧॥

સર્વજ્ઞાને સદાનન્દે સર્વરૂપે નમો નમઃ ।
સમ્પન્નાયૈ કુમાર્યૈ ચ સર્વજ્ઞાયૈ નમો નમઃ ॥ ૧૨॥

યોગરૂપે રમાદેવ્યૈ યોગાનન્દે નમો નમઃ ।
દિવ્યજ્ઞાયૈ ત્રિનેત્રાયૈ દિવ્યમૂર્ત્યૈ નમો નમઃ ॥ ૧૩॥

અર્ધચન્દ્રજટાધારિ ચન્દ્રબિમ્બે નમો નમઃ । (અર્ધચન્દ્રધરે દેવિચન્દ્રરૂપે)
ચન્દ્રાદિત્યજટાધારિ ચન્દ્રબિમ્બે નમો નમઃ ॥ ૧૪॥ (ચન્દ્રાદિત્યસમે દેવિ ચન્દ્રભૂષે)

અણુરૂપે મહારૂપે વિશ્વરૂપે નમો નમઃ ।
અણિમાદ્યષ્ટસિદ્ધાયૈ આનન્દાયૈ નમો નમઃ ॥ ૧૫॥

જ્ઞાનવિજ્ઞાનરૂપાયૈ જ્ઞાનમૂર્તે નમો નમઃ ।
નાનાશાસ્ત્રસ્વરૂપાયૈ નાનારૂપે નમો નમઃ ॥ ૧૬॥

પદ્મદે પદ્મવંશે ચ પદ્મરૂપે નમો નમઃ ।
પરમેષ્ઠ્યૈ પરામૂર્ત્યૈ નમસ્તે પાપનાશિની ॥ ૧૭॥

મહાદેવ્યૈ મહાકાલ્યૈ મહાલક્ષ્મ્યૈ નમો નમઃ ।
બ્રહ્મવિષ્ણુશિવાખ્યાયૈ બ્રહ્મનાર્યૈ નમો નમઃ ॥ ૧૮॥

કમલાકરપુષ્પા ચ કામરૂપે નમો નમઃ । (કમલાકરગેહાયૈ)
કપાલિ કર્મદીપ્તાયૈ કર્મદાયૈ નમો નમઃ ॥ ૧૯॥ (કપાલિપ્રાણનાથાયૈ)
સાયં પ્રાતઃ પઠેન્નિત્યં ષાણ્માસાત્સિદ્ધિરુચ્યતે ।
ચોરવ્યાઘ્રભયં નાસ્તિ પઠતાં શ‍ૃણ્વતામપિ ॥ ૨૦॥

ઇત્થં સરસ્વતીસ્તોત્રમગસ્ત્યમુનિવાચકમ્ ।
સર્વસિદ્ધિકરં નૄણાં સર્વપાપપ્રણાશનમ્ ॥ ૨૧॥

॥ ઇત્યગસ્ત્યમુનિપ્રોક્તં સરસ્વતીસ્તોત્રં સમ્પૂર્ણમ્ ॥

Proofread by Ravin Bhalekar ravibhalekar@hotmail.com, PSA Easwaran

*Shri Sarasvati Stotram (Agastyamuni Proktam)*

pdf was typeset on October 9, 2021

Please send corrections to *sanskrit@cheerful.com*